# vAsudevastutiH Aitareya's Hymn to Lord VAsudeva

# ઐતેરેયકૃતા વાસુદેવસ્તુતિઃ

## Document Information

Text title : Vasudevastutih by aitereya

File name : vAsudevastutiHaitereya.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Description/comments : skandamahApurANa | mAheshvarakhaNDe kaumArikAkhaNDe | adhyAyaH 42.187-218||

Latest update : July 5, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઐતેરેયકૃતા વાસુદેવસ્તુતિઃ

નમસ્તુભ્યં ભગવતે વાસુદેવાય ધીમહિ ।
પ્રદ્યુમ્નાયાનિરુદ્ધાય નમઃ સઙ્કર્ષણાય ચ ॥ ૧૮૭॥

નમો વિજ્ઞાનમાત્રાય પરમાનન્દમૂર્તયે ।
આત્મારામાય શાન્તાય નિવૃત્તદ્વૈતદૃષ્ટયે ॥ ૧૮૮॥

આત્માનન્દાનુરુદ્ધાય સમ્યક્તયક્તોર્મયે નમઃ ।
હૃષીકેશાય મહતે નમસ્તેઽનન્તશક્તયે ॥ ૧૮૯॥

વચસ્યુપરતે પ્રાપ્યો ય એકો મનસા સહ ।
અનામરૂપચિન્માત્રઃ સોઽવ્યાન્નઃ સદસત્પરઃ ॥ ૧૯૦॥

યસ્મિન્નિદં યતશ્ચેદં તિષ્ઠત્યપૈતિ જાયતે ।
મૃણ્મયેષ્વિવ મૃજ્જાતિસ્તસ્મૈ તે બ્રહ્મણે નમઃ ॥ ૧૯૧॥

યં ન સ્પૃશન્તિ ન વિદુર્મનોબુદ્ધીન્દ્રિયાસવઃ ।
અન્તર્બહિશ્ચ વિતતં વ્યોમવત્પ્રણતોઽસ્મ્યહમ્ ॥ ૧૯૨॥

દેહેન્દ્રિયપ્રાણમનોધિયોઽમી યદંશબદ્ધાઃ પ્રચરન્તિ કર્મસુ ।
નૈવાન્યદાલોહમિવ પ્રતપ્તં સ્થાનેષુ તદ્દૃષ્ટપદેન એતે ॥ ૧૯૩॥

ચતુર્ભિશ્ચ ત્રિભિર્દ્વાભ્યામેકધા પ્રણમામિ તમ્ ।
પૂર્વાપરાપરયુગે શાસ્તારં પરમીશ્વરમ્ ॥ ૧૯૪॥

હિત્વા ગતીર્મોક્ષકામા યં ભજન્તિ દશાત્મકમ્ ।
તં પરં સત્યમમલં ત્વાં વયં પર્યુપાસ્મહે ॥ ૧૯૫॥

ૐ નમો ભગવતે મહાપુરુષાય મહાનુભાવાય વિભૂતિપતયે
સકલસાત્વતપરિવૃઢનિકરકરકમલોત્પલકુડ્મલોપલાલિતચરણારવિન્દ-
યુગલ પરમપરમેષ્ઠિન્નમસ્તે ॥ ૧૯૬॥

તવાગ્નિરાસ્યં વસુધાઙ્ઘ્રિયુગ્મં નભઃ શિરશ્ચન્દ્રરવી ચ નેત્રે ।

સમસ્તલોકા જઠરં ભુજાશ્ચ દિશશ્ચતસ્રો ભગવન્નમસ્તે ॥ ૧૯૭॥

જન્માનિ તાવન્તિ ન સન્તિ દેવ નિષ્પીડ્ય સર્વાણિ ચ સર્વકાલમ્ ।
ભૂતાનિ યાવન્તિ મયાત્ર ભીમે પીતાનિ સંસારમહાસમુદ્રે ॥ ૧૯૮॥

સમ્પચ્છિલાનાં હિમવન્મહેન્દ્રકૈલાસમેર્વાદિષુ નૈવ તાદૃક્ ।
દેહાનનેકાનનુગૃહ્ણતો મે પ્રાપ્તાસ્તિ સમ્પન્મહતી તથેશ ॥ ૧૯૯॥

ન સન્તિતે દેવ ભુવિ પ્રદેશા ન યેષુ જાતોઽસ્મિ તથા વિનષ્ટઃ ।
ભૂત્વા મયા યેષુ ન જન્તવશ્ચ સમ્ભક્ષિતો વા ન ચ ભૂતસઙ્ઘૈઃ ॥ ૨૦૦॥

શોકાભિભૂતસ્ય મમાશ્રુ દેવ યાવત્પ્રમાણં પતિતં ભવેષુ ।
તાવત્પ્રમાણં ન જલં પયોદા મુઞ્ચન્તિ દિવ્યૈરપિ વર્ષલક્ષૈઃ ॥ ૨૦૧॥

મન્યે ધરિત્રીપરમાણુસઙ્ખ્યામુપૈતિ પિત્રોર્ગણના ન મહ્યમ્ ।
મિત્રાણ્યમિત્રાણ્યનુજીવ્યબન્ધૂન્સઙ્ખ્યાતુમીશોઽસ્મિન દેવદેવ ॥ ૨૦૨॥

ત્વય્યર્પિતં નાથ પુનઃ પુનર્મે મનઃ સમાક્ષિપ્ય સુદુર્ધરારિ ।
કામો વશં ક્રુધમુખૈઃ સહાયૈઃ કરોતિ કિં તદ્ભગવન્કરોમિ ॥ ૨૦૩॥

સોઽહં ભૃશાર્તઃ કરુણાકરસ્ત્વં સંસારગર્તે પતિતસ્ય વિષ્ણો ।
મહાત્મનાં સંશ્રયમભ્યુપેતો નૈવાવસીદત્યપિ દુર્ગતોઽપિ ॥ ૨૦૪॥

પરાયણં રોગવતો હિ વૈદ્યો મહાબ્ધિમગ્નસ્ય ચ નૌર્નરસ્ય ।
બાલસ્ય માતાપિતરૌ સુઘોરસંસારખિન્નસ્ય હરે ત્વમેવ ॥ ૨૦૫॥

પ્રસીદ સર્વેશ્વર સર્વભૂત સર્વસ્ય હેતો પરમાર્થસાર ।
મામુદ્ધરાસ્માદુરુદુઃખસઙ્ઘાત્સંસારગર્તાત્સ્વપરિગ્રહેણ ॥ ૨૦૬॥

ક્ષુત્તૃટ્ત્રિધાતુભિરિમં મુહુરર્દ્યમાનં
શીતોષ્ણ વાતસલિલૈરિતરેતરાચ્ચ ।
કામાગ્નિનાચ્યુત રુષા ચ સુદુર્ભરેણ
સમ્પશ્યતો મમ ઉરુક્રમ સીદતો હિ ॥ ૨૦૭॥

ભવન્તુ ભદ્રાણિ સમસ્તદોષાઃ પ્રયાન્તુ નાશં જગતોઽખિલસ્ય ।
મયાદ્ય ભક્ત્યા પરમેશ્વરે પ્રભૌ સ્તુતે જગદ્ધાતરિ વાસુદેવે ॥ ૨૦૮॥

યે ભૂતલે યે દિવિ ચાન્તરિક્ષે રસાતલે પ્રાણિગણાશ્ચ કેચિત્ ।
ભવન્તુ તે સિદ્ધિયુજો મયાદ્ય સ્તુતે જગદ્ધાતરિ વાસુદેવે ॥ ૨૦૯॥

અજ્ઞાનિનો જ્ઞાનવિદો ભવન્તુ પ્રશાન્તિભાજઃ સતતોગ્રચિત્તાઃ ।

મયા ચ વિશ્વમ્ભરણે હ્યનન્તે સ્તુતે જગદ્ધાતરિ વાસુદેવે ॥ ૨૧૦॥

શ્રૃણ્વન્તિ યે મે સ્તુવતસ્તથાન્યે પશ્યન્તિ યે મામિદમીરયન્તમ્ ।
દેવાસુરાદ્યા મનુજાસ્તિરશ્ચો ભવન્તુ તેઽપ્યચ્યુતયોગભાજઃ ॥ ૨૧૧॥

યે ચાપિ મૂકા વિકલેન્દ્રિયત્વાત્પઠન્તિ નો નૈવ વિલોકયન્તિ ।
પશ્વાદયઃ કીટપિપીલિકાદ્યા ભવન્તુ તેઽપ્યચ્યુતયોગભાજઃ ॥ ૨૧૨॥

નશ્યન્તુ દુઃખાનિ જગત્યપેતુ લોભાદિકો દોષગણઃ પ્રજાભ્યઃ ।
યથાત્મનિ ભ્રાતરિ ચાત્મજે વા તથા નરસ્યાસ્તુ જનેપિ ભાવઃ ॥ ૨૧૩॥

સંસારવૈદ્યેઽખિલદોષહાનિવિચક્ષણે નિર્વૃતિહેતુભૂતે ।
સંસારબન્ધાઃ શિથિલીભવન્તુ હૃદિ સ્થિતે સર્વજનસ્ય વિષ્ણૌ ॥ ૨૧૪॥

પાપં પ્રણાશં મમ ચ પ્રયાતુ યન્માનસં યચ્ચ કરોમિ વાચા ।
શરીરમપ્યાચરિતં ચ યન્મે સ્મૃતે જગદ્ધાતરિ વાસુદેવે ॥ ૨૧૫॥

યથા હિ વા વાસુદેવેતિ પ્રોક્તે સઙ્કીર્ત્તને વિષ્ણુભક્તસ્ય વાપિ ।
સ્મૃતે હરૌ વાપિ પ્રયાતિ પાપં સત્યેન મે નશ્યતાં તેન પાપમ્ ॥ ૨૧૬॥

મૂઢોઽયમલ્પમતિરલ્પવિચેષ્ટિતોઽયં
ક્લિષ્ટં મનોઽપિ વિષયૈર્મયિ ન પ્રસઙ્ગિ ।
ઇત્થં કૃપાં કુરુ મયિ પ્રણતેઽખિલેશ
ત્વાં સ્તોતુમમ્બુજભવોઽપિ હિ દેવ નેશઃ ॥ ૨૧૭॥

સ ત્વં પ્રસીદ ભગવન્કુરુ મય્યનાથે
વિષ્ણો કૃપાં પરમકારુણિકઃ કિલ ત્વમ્ ।
સંસારસાગરનિમગ્નમનન્ત દીન-
મુદ્ધર્તુમર્હસિ હરે પુરુષોત્તમોસિ ॥ ૨૧૮॥

ઇતિ શ્રીસ્કાન્દે મહાપુરાણે એકાશીતિસાહસ્ર્યાં સંહિતાયાં પ્રથમે
માહેશ્વરખણ્ડે કૌમારિકાખણ્ડે શ્રીવૃદ્ધવાસુદેવમાહાત્મ્યવર્ણન
ઐતેરેયબ્રાહ્મણચરિત્રવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયે
વાસુદેવસ્તુતિઃ સમાપ્તા ।

- ॥ સ્કન્દમહાપુરાણ । માહેશ્વરખણ્ડે કૌમારિકાખણ્ડે । અધ્યાયઃ ૪૨.૧૮૭-૨૧૮॥

- .. skandamahApurANa . mAheshvarakhaNDe kaumArikAkhaNDe . adhyAyaH 42.187-218..

The verses 187-193 196 occur in bhAgavatapurANa
ShaShThaskandhaH (6) adhyAya 16 verses 18-25

*vAsudevastutiH Aitareya's Hymn to Lord VAsudeva*
pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*